रसगन्धमर्थपञ्चकम् इति[2] चतुर्विंशतितत्त्वानि । तदभिवृद्धिकारणमभ्यवहृतान्नरसविशेषः । स त्रिविधः स्थूलसूक्ष्मपरत्वेन । तत्र स्थूलः स्थूलशरीरपोषकः, सूक्ष्म इन्द्रियपोषकः, परोऽन्तःकरणपोषकः ।

तत्र स्थूलशरीरे सर्वत्राग्निमारुतयोगादन्नरसपाकः । तावुभौ प्रत्येकं दशविधौ । तत्र सप्ताग्नयो धातुगताः, त्रयो दोषगताः । तथा वायुः । प्राणापानव्यानोदानसमानाः[3] पञ्चैते प्रधानवायवः । तदन्ये नागकूर्मकृकलदेवदत्तधनञ्जयाः । तेषां भुक्ताहारपचनार्थमूर्ध्वाधो गच्छतः प्राणापानौ, तद्रसमादाय[4] सर्वधातून् व्याप्नोति[5] व्यानः, सर्वचेष्टाः[6] कुर्वन् प्राणसहगो निमेषोन्मेषणकृद् उदानः, सर्वत्र[7] रसं नयति समानः, उद्गारकारको नागः, उन्मीलकारकः कूर्मः, क्षुतकृत् कृकलः, देवदत्तो जृम्भणकरः[8], स्वकृद् धनञ्जयश्च । इति प्रदर्शिताः सर्वे वायवो वह्निविशेषाश्च ।

तदुभयवर्गैरिह[9] पच्यमानाः शरीरधातवः सर्वेऽन्नरसमयाः । ते[10] त्वगसृङ्मांसमेदोऽस्थिमज्जाशुक्राणि । धातवो देहधारणा दूष्यन्ते[11] त्रिभिर्दोषैः । ते दोषा वातपित्तकफाः । शरीरेन्द्रियान्तःकरणदूषणाद् दोषाः । तस्मादन्नरसस्य पाञ्चभौतिकत्वात् तत्परिणामशरीरं धातुदोषमलसमुदायः पाञ्चभौतिकं स्थूलान्नरसमयम् ।

---

१. '...च तन्मात्राय', २ 'ति प्रदर्शितानि समवायिकारणत' घ पाठ. ३ 'नाश्चैते' ख. पाठः. ४ 'नी' घ. पाठः. ५. 'तीति व्या' क. पाठ. ६. 'ष्टा' ख. पाठः. ७. 'तीति स' क. पाठः. ८. 'करः कृ' ख. पाठः. ९. 'तदुभ' क. पाठः. १०. 'ते रसास्त्व' ख. पाठः. ११. 'न्ते च त्रि' क. पाठः.

DR. RUPNATHJI (DR. RUPAK NATH)

सूक्ष्मान्नरसमयमिन्द्रियदशकम् । तद्बलादेव श्रोत्रादीनां शब्दस्पर्शरूपरसगन्धपरिज्ञानं, वागादीनां वचनादानगतिविसर्गानन्दकरणशक्तिश्च । परान्नरसमयमन्तःकरणम् । तद्बलादेव मनसो मननत्वं, बुद्धेर्बोधकर्तृत्वम्[2], अहंकारस्याहंकर्तृत्वं, चित्तस्य चेतयितृत्वम्[3]। तत्र शरीरेन्द्रियान्तःकरणाभिवृद्धिक्रमेण ज्ञानवृद्धिरनुभूयते । तदुक्तं भगवता—

"ज्ञातास्मीति यदा भावो मनोबुद्धिमान्[4] ।
जातश्चित्पूर्वको[5] जन्तोः स भावः क्रमवर्धितः ॥"

इति । प्रतिदिनमभ्यवहृताऽन्नरसाभिवृद्धिक्रमेण ज्ञातृभावोऽभिवर्धत इति वाक्यशेषः ।

तच्चैतन्याविर्भावे बहवो विप्रतिपद्यन्ते । तत्र लोकायतश्चातुर्भौतिकशरीरेण परिपाकक्रमेण भूतसमुदायतो[6] मदशक्तिवच्चैतन्याविर्भावो भवतीति, दिगम्बरोऽन्नरसपरिपाकविशेषादिन्द्रियद्वारेणात्मनः§, बुद्धो बुद्धेरन्नायतनवृद्धिक्रमेण, वैशेषिकनैयायिकभाट्टप्राभाकराः[8] शारीरैर्भौतिकेन्द्रियैरर्थसंयोगे सत्यात्ममनःसंयोगात्(?) सांख्यो ज्ञानाश्रयः सूक्ष्मशरीरं तत् कर्मवशादितः कुतश्चिदन्तराविर्भवतीति, मनुर्मातापितृशोणितशुक्लव्याप्तचैतन्यमन्नाभिवृद्धिक्रमेणाविर्भवतीति, केचिद् वैदान्तिकाः ब्रह्मावयवाः क्षेत्रज्ञास्तत्तत्कर्मानुगुणशरीरेष्वाविर्भवन्तीति, ब्रह्मवादिनो ब्रह्म-

१. 'मनवि' क. पाठः. २. 'कृत्व', ३. 'त्वम् । अन्तःकरणात्मसमुदायः पुरुषोऽन्नरसमयश्चैतन्यस्याश्रयः । त' ख. पाठः. ४. 'अतः श', ५. 'मूर्तिमान्', ६. 'मवाय', ७. 'देऽरमस्य' क. पाठः. ८. 'भूतेन्द्रि' ख. पाठः. ९. 'दावि', १०. 'स्तत्क' क. पाठः. ११. 'मेश' ख पाठः.

§ 'आविर्भाव' इति संबन्धनीयमिति भाति ।

DR. RUPNATHJI( DR. RUPAK NATH)

पिशाखाः । सर्वे ते प्रदर्शिताश्चत्वारो वेदाः प्रविभक्तशाखाः ।

तेषामेकैका शाखा दिङ्मात्रेणात्र प्रदर्श्यते सर्वशाखा[2]-प्रदर्शनत्वेन । तत्र[3] पादव्यवस्था ऋगिति बाह्वृच्यलक्षणम् । गीतिषु समाख्या सामलक्षणम् । शेषे यजुरिति यजुर्लक्षणम् । ऋग्यजुर्मयोऽथर्वा इत्यथर्वलक्षणम् । इति[4] सामान्यलक्षणं चतुर्विधम् । तत्र बाह्वृचलक्षणस्यैतरेयशाखायां[5] मन्त्रसंहिता[6] पादमिता[7] । तत्प्रमाणमृचां दशसहस्रं पञ्चशताधिकम् । अशीतिः पादाश्च । तदध्यायाश्चतुरुत्तरषष्टिः । अष्टावष्टकाः प्रथमाष्टकद्वितीयाष्टकादिभेदेन । तद्ब्राह्मणं पञ्चाशदध्यायाः । तद् दशकपञ्चकम् । पञ्चमदशकमारण्यकम् । तदन्यत् कर्मकाण्डविषयम् । तथा सामवेदस्य रथन्तरादिगानविशेषाणां प्रमाणं चतुःशताधिकमेकादशसहस्रम्[8] । सर्वेषां गानविशेषाणामृचो योनिः । तत्र तलवकारशाखायां प्रथमपादो मन्त्रः । स तु बह्वध्यायनिबद्धोऽग्नीन्द्रादिस्तुतिविषयः[9] । तद्ब्राह्मणमुत्तरपादः खण्डसमूहः । तत्प्रमाणं सहस्राधिकमष्टचत्वारिंशदुत्तरं शतत्रयम् । तदारण्यकं पञ्चाशदुत्तरशतं खण्डाः । तेषा त्रिंशदुत्तमाः । तत्रापि चत्वारो ब्रह्मज्ञानविषयाः । तथा यजुर्वेदे तैत्तिरीयशाखा मन्त्रब्राह्मणमिश्रा । सा द्विविधा संहिताशाखाभेदेन । तत्र संहिता चतुष्पाठा[10] सप्तकाण्डा चतुश्चत्वारिंशत्प्रश्ना च । तत्र प्रथमकाण्डेऽष्टौ[11] प्रश्नाः, द्वितीयसप्तमौ पञ्च पञ्च, तृतीयचतुर्थौ सप्त

---

१. 'दा । त', २ 'साना प्र' क पाठ. ३. 'न तत्र पा' ख पाठ ४ 'शि । त ५. चस्यै' घ पाठ ६ ताया पा' ख पाठ. ७ 'ति', ८ 'शरशम, ९. दिमतुरापरु १० तुश्चतुष्पा' च पाठ ११ ण्डे' घ. पाठ.

DR.RUPNATHJI(DR.RUPAK NATH)

ल्पनाविषयस्तनुभुवनात्मकः प्रपञ्चः । तत्र मूलाज्ञानवासनानिबन्धनः संस्कारस्कन्धः । तन्निबन्धनो[2] वेदनास्कन्धः । तन्निबन्धनो विज्ञानस्कन्धः । तन्निबन्धनो रूपस्कन्धः । तत्र द्वादशायतनम् । श्रोत्रत्वगक्षिजिह्वाघ्राणानि मलयपञ्चकम् । वाक्पाणिपादपायूपस्थाश्च ते कारकपञ्चकम् । मन इत्येकं करणम् । बुद्धिरिति सामुदायिकचैतन्यम् । तदेतत्कलापः सर्वोऽपीदृशः । तदाश्रयं नामजातिगुणक्रियाद्रव्यभेदेन पञ्चविधं कल्पनामतं तनुभुवनम् । तदुभयात्मकं बौद्धशास्त्रप्रमेयम् । तत्प्रमाणं द्विविधं प्रत्यक्षानुमानभेदेन । तत्र प्रथममक्षसन्निपातजनितं ज्ञानं प्रत्यक्षम् । लिङ्गदर्शनाल्लिङ्गि[4]ज्ञानमनुमानम् । तदुभयप्रमाणप्रमेयव्यवहरणचतुर्विधज्ञाननिवृत्तिस्तन्निवृत्तिमूलाज्ञानम् । (?) तत्कर्मे शुद्धबुद्धिरवशिष्यते । सा मुक्तस्य मुक्तिरित्यभिहिता । तदेव प्रतिज्ञातं बुद्धमुनिना—

"उत्पादस्थितिभङ्गदोषरहितां सर्वागमोन्मूलिनीं
ग्राहोत्सर्गवियोगयोगजनितां नाभावभावान्विताम् ।
तामन्तर्द्वयवर्जितां निरुपमामाकाशवन्निर्मलां
प्रज्ञापारमितां जनस्य जननीं शृण्वन्तु बोध्यर्थिनः[5] ॥"

इति[6] । प्रज्ञापारमिता शुद्धबुद्धिरशेषसंसारदुःखनिवारणीति प्रदर्शितं बौद्धमतम् ।

---

१. 'त्मप्र' ख. ग. पाठः. २ 'नो रू' ख. ग. पाठः. ३. 'काक्षाः स' ग., 'कालावयवः स' ख. पाठः. ४. 'ङ्गिनि ज्ञा' ग. पाठः. ५. 'बौ' घ. पाठः. ६. 'प्रतिज्ञा' ग. पाठः. ७. 'द्वि' ख. पाठः. ८. 'पदुः' ग. पाठः.

DR.RUPNATHJI(DR.RUPAK NATH)

